# Shri Nanda NandanaShTakam

# श्री नन्द नन्दनाष्टकम्

## Document Information

Text title : nandanandanAShTakam

File name : nandanandanAShTakam.itx

Category : vishhnu, krishna, aShTaka

Location : doc_vishhnu

Proofread by : PSA Easwaran

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Shri Nanda NandanaShTakam

# श्री नन्द नन्दनाष्टकम्

सुचारुवक्त्रमण्डलं सुकर्णरत्नकुण्डलम् ।
सुचर्चिताङ्गचन्दनं नमामि नन्दनन्दनम् ॥ १॥

सुदीर्घनेत्रपङ्कजं शिखीशिखण्डमूर्धजम् ।
अनन्तकोटिमोहनं नमामि नन्दनन्दनम् ॥ २॥

सुनासिकाग्रमौक्तिकं स्वच्छदन्तपङ्क्तिकम् ।
नवाम्बुदाङ्गचिक्कणं नमामि नन्दनन्दनम् ॥ ३॥

करेणवेणुरञ्जितं गतिः करीन्द्रगञ्जितम् ।
दुकूलपीतशोभनं नमामि नन्दनन्दनम् ॥ ४॥

त्रिभङ्गदेहसुन्दरं नखद्युतिः सुधाकरम् ।
अमूल्यरत्नभूषणं नमामि नन्दनन्दनम् ॥ ५॥

सुगन्ध अङ्गसौरभं उरो विराजि कौस्तुभम् ।
स्फुरत् श्रीवत्सलाञ्छनं नमामि नन्दनन्दनम् ॥ ६॥

वृन्दावनसुनागरं विलासानुगवाससम् ।
सुरेन्द्रगर्वमोचनं नमामि नन्दनन्दनम् ॥ ७॥

व्रजाङ्गनासुनायकं सदा सुखप्रदायकम् ।
जगन्मनःप्रलोभनं नमामि नन्दनन्दनम् ॥ ८॥

श्रीनन्दनन्दनाष्टकं पठेद्यः श्रद्धयान्वितः ।
तरेद्भवाब्धिदुस्तरं लभेत्तदङ्घ्रियुक्तकम् ॥

इति श्रीनन्दनन्दनाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Nanda NandanaShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*